International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 85-87
© 2026 IJMH
www.themultijournal.com
Received: 28-06-2026
Accepted: 24-07-2026
Publish : 25-07-2026

**जोगेश्वर गडत्या**
शोधच्छात्र,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**जोगेश्वर गडत्या**
शोधच्छात्र,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# आचार्य जि.एस्.आर्.कृष्णमूर्तिमहोदयस्य 'ब्रह्मोत्सवतारावली'-एकम् अध्ययनम्।

**जोगेश्वर गडत्या**

**प्रस्तावना-**

आधुनिककाले बहुकवयः नक्षत्रमालाकाव्यानि रचयन्ति। 'नक्षत्रमाला' काव्यस्य लक्षणप्रसङ्गे उच्यते- **'सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैः'** इति। अर्थात् सप्तविंशतिमुक्तारुपसप्तविंशतिश्लोकान् स्वीकृत्य रचितं काव्यं नक्षत्रमालाकाव्यमुच्यते। **'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते'** **इति** वचनानुसारं नक्षत्रमालाकाव्यरचनायाः निश्चितम् उद्देश्यमस्ति। नक्षत्रमालाकाव्यं पठित्वा तत्र प्रतिपादितानां जीवनादर्शानां व्यवहारक्षेत्रे प्रयोगः क्रियते चेत्,जनः आदर्शपुरुषः भवितुं शक्नोति। तेन आदर्शजनेन परिवारः,पुनः परिवारेण ग्रामः तथा देशोऽपि प्रभावितः भवेत्।

केचन तारावली केचन तारामाला केचन नक्षत्रमालिका इति वा नामकरणं कुर्वन्ति।तेषु **'ब्रह्मोत्सवतारावली'** इति नक्षत्रमाला अन्यतमा। प्रभुवेंकटेशस्य ब्रह्मोत्सवमहिमा विषये अत्र वर्णितमस्ति।

**नामकरणं पौराणिकपृष्ठभूमिः च-**

पौराणिककथानुसारं जगतः रचयिता ब्रह्मा स्वयम् अस्य उत्सवस्यारम्भं कृतवान्। भगवतः श्रीनिवासस्य लोककल्याणार्थं पृथिव्याम् अवतरणस्य स्मरणार्थं ब्रह्मणा एषः महोत्सवः आयोजितः। अतः अस्य नाम 'ब्रह्मोत्सवः' इति।

**ब्रह्मोत्सवस्य समयः-**

एषः महोत्सवः प्रतिवर्षम् आश्वीनमासे शारदीयनवरात्रसमये नवदिनानि यावत् महता वैभवेन आचर्यते। अस्मिन् समये समग्रतिरुमालापर्वतः दीपैः,पुष्पैः,तोरणैः च स्वर्ग इव प्रदीप्तः भवति।

**प्रमुखाः विधयः वाहनसेवाः च-**

कविः प्रभुवेङ्कटेशस्य परमभक्तः।श्रीवेङ्कटेशः जगतः नाथ इति।श्रीवेङ्कटेशस्य निकटे वर्षेषु बहुनि पर्वाणि पालितानि भवन्ति । तेषु 'ब्रह्मोत्सवः मुख्यः ।' इदं पर्व नवदिनं यावत् पाल्यते। प्रभुः श्रीवेङ्कटेशः प्रतिदिनं भिन्नभिन्नरूपधारणं कृत्वा नगरपरिक्रमां करोति । भक्ताः मुक्ताकाशतले प्रभुवेङ्कटेशस्य दर्शनं प्राप्नुवन्ति । नवदिनेषु प्रभुः नूतनं नूतनं वेशधारणं करोति। तेषां वेशानां विषये कविना सम्यक्तया वर्णितम्। ब्रह्मोत्सवपालने भक्तानां समागमः तिरुमालायां दृश्यते । महत्या साजसज्जया कोलाहलपरिपूर्णेन सह विभिन्नवाद्यध्वनिना तिरुमाला प्रकम्पते । भक्ताः प्रभोः श्रीवेङ्कटेशस्य दर्शनं कृत्वा स्वस्य मनोरथं पूरयन्ति।

नानावाद्यध्वनिना तिरुमाला प्रकम्पते। यथा-

**सच्छत्रचामरमहोद्यमवाद्यबृन्दे**
**भेरीनिनादरसिते मधुमंडपेऽस्मिन्।**
**सेनापतेस्स्वयमिहात्र नवांकुराणि**
**प्रायोपयत्यनितरं शरदः प्रभूत्वे।।**[1]

ब्रह्मोत्सवदर्शनाय स्वर्गतः स्वयं ब्रह्माऽपि समागच्छति।यथा-

**'ब्रह्मा स्वयं भगवतो भुवि मार्गदर्शी।।**[2]

प्रभुः गजस्योपरि उषित्वा आगच्छति।यथा-

**अश्वैश्च राजसयूतैः तदनुप्रसन्नैः**

**ऐश्वर्यसूचकगजैः किल धर्मरपैः।।**[3]

प्रभोः रथस्योपरि उषित्वा गमनकाले वैष्णवाः वेदपाठं कुर्वन्ति।वाद्यध्वनिना नगरं प्रकम्पते। प्रभुः आनन्दितः सन् आशिषं करोति।कविना उच्यते यत्-

**रथ्यासु दर्शितपथो विबुधाग्रवन्द्यः**
**श्रीवेङ्कटाद्रिनिलयश्श्रितशेषभागः।**
**आनन्ददायिनिलयं परितो विभाति**
**सर्वाश्च भक्तजनतां कुशलं च रक्षन्।।**[4] ब्र.ता-श्लो.6

प्रभुवेङ्कटेशस्य हंसवाहनविषये कविना उच्यते यत्-

**हंसं परं समधिरुह्यः महाधिहंसः**
**वीणां करेण मधुवादनतत्परस्सन् ।**
**वेदोपदेशमनिशं कलयन्मुरारिः**
**श्री वेङ्कटाद्रिनिलयो भुवनैकरक्षः।।**[5]

कविना सिंहवाहनवर्णनं क्रियते यथा-

**योगस्य वाहनगतेः परिपूर्णशक्तेः**
**संसूचकं मृगपसिंहमिहाधिरुह्य ।**
**श्रीनारसिंहकलया बहुभक्तसंघान्**
**प्रहलादयन् विजयते भुवि वेङ्कटेशः।।**[6]

सर्वभूपालवाहनविषये उच्यते-

**राजाधिराजवृषभाचलनायकोऽसौ**
**दिक्पालवाहशिबिकामधिरुह्य देवः ।**
**लोकेश्वरत्वमतुलं निजशक्तियुक्तम्**
**लोकाय बोधयति भूपति चक्रवर्ती ।।**[7]

प्रभुः गरुडस्योपरि आरुह्य आगच्छति।यथा-

**गोदासमर्पितसुवासितपुष्पमालाम्**
**लक्ष्मीसुहारमणिभूषिसहस्रनाम्नाम्**
**मालां विधार्य गरुडोपरि सन्निविष्टः**
**श्रीवेङ्कटाद्रिनिलयो जयति प्रसन्नः।।**[8]

हनुमद्वाहने उपविश्य आयाति।यथा-

**भक्तांजनेयमधिरुह्य महाविभूतिः**
**रामावतार हनुमत्परितोषितोऽसौ।**
**श्रीवैष्णवैरविरलैः परिसेव्यमानः**
**श्रीवेङ्कटाद्रिनिलयो जयति प्रसन्नः।।**[9]

रथोत्सवविषये कविना उच्यते-

**रंभारसालकुसुमाकरमालिकाभिः**
**संशोभितं रथमनंतपथं निविश्य।**
**श्रीभूपतिर्निजजनं प्रतिबोधयन्वै**
**आत्मानमत्र रथिनं च विराजतेऽसौ।।**[10]

अनेन प्रकारेण कविना ब्रह्मोत्सवस्य विषये सम्यक्तया प्रतिपादितम्। काव्येऽस्मिन् प्रसादगुणाः सन्ति।भाषा सरला कोमला च। वैदर्भी रीतिः। वसन्ततिलकाछन्दसः प्रयोगः। अनुप्रास-उपमा-उत्प्रेक्षा-अतिशयोक्ति-काव्यलिङ्गादीनाम् अलङ्काराणां प्रयोगः भवति। अत्र भक्तिरसः अङ्गीरुपेण व्यज्यते।

प्रभुः प्रतिदिनं नवनववेशं धारयित्वा भक्तेभ्यः मन्दिरात् बहिः दर्शनं ददाति। भगवन् सिंह-मुक्ताकाय-कल्पवृक्ष-सर्वभूपाल-मोहिनी-गरुड-हनुमत्-गज-सूर्यप्रभा-चन्द्रप्रभा-अश्विनी-प्रभृतीन् वाहन- रुपेण नीत्वा तदुपरि उपविश्य च पर्वतपरिक्रमां करोति। कविः ब्रह्मो-त्सवफलं वर्णयति यथा-

**ये मानवाश्च वपुषा मनसा च नित्यम्**
**ब्रह्मोत्सवे प्रतिपलं गरुडाद्रिनाथम्।**
**संप्रार्चयन्ति सततं धनधान्ययुक्ताः**
**ते सर्वथा भुवि च राज्यपदं लभन्ते।।**[11]

ब्रह्मोत्सवे ये नागरिकाः भक्ताः वा दर्शनाय आगच्छन्ति अपि च धनधान्यादीन् प्रेम्णा अर्पयन्ति,मनसि यत् च कामयन्ते तेषां मनोरथस्य पूरणं भवति इति विश्वासः अस्ति। प्रभु वेङ्कटेशः यः नित्यं स्वस्य मङ्गलनिमित्तं प्रार्थयति सः धनपदवी-कीर्तिं च लभते।

**ब्रह्मोत्सवे प्रतिदीनं भुवि वाहनानाम्**
**ब्रह्माण्डनायकमहोत्सवपुण्यकाले ।**
**प्रह्लादनारदविभीषणभक्तबृन्दैः**
**आराधितो विजयते भुवि वेङ्कटेशः ।।**[12]

ब्रह्मोत्सवे प्रतिदिनभिन्नवाहनानामुपरि भिन्नवेशं धृत्वा आसीनं ब्रह्माण्डनायकप्रभुवेङ्कटेशं मानवाः किं प्रह्लाद-नारद-विभीष-णादयोऽपि भक्ताः आराधयन्ति। स एव समयः पुण्यसमयः। प्रभुवेङ्कटेशमाराधनेन बहुपुण्यं लभते मानवः अतः ब्रह्मोत्सवदर्शनं करणीयम्। एवं प्रकारेण प्रभुवेङ्कटेशस्य ब्रह्मोत्सवस्य माहात्म्यं कविना कतिभिः श्लोकैः रच्यते एवञ्च तस्य फलं सामाजिकाः अनुभवन्ति। कविरत्र स्वस्य तथा विश्वस्य मङ्गलं कामयते।

**ब्रम्होत्सवतारावलीखण्डकाव्यस्य सामाजिकमहत्त्वम्-**

प्रभुः वेङ्कटेशः त्रिपुरस्य राध्यदेवः। तेन सृष्ट-स्थिति-प्रलयाः क्रियन्ते। सर्वधर्मसमन्वयः तस्य निकटे उपलभ्यते। तस्य सान्निध्यं जाति-धर्म-वर्ण-निर्विशेषेण सर्वे प्राप्नुवन्ति। ब्रह्मोत्सवेन सह सामाजिकजीवनस्य सम्पर्कं विद्यते। भगवान् वेङ्कटेशः रथस्योपरि भ्रमणकाले वैष्णवभक्ताः वेदपाठं कुर्वन्ति। भक्ताः वाद्ययन्त्रं चालयन्ति।फलतः परिवेशः प्रकम्पितः।भक्ताः आनन्दिताः। स्वर्गस्थाः देवाः अपि आगत्य भगवान् वेङ्कटेशं स्तुवन्ति सेवन्ते च । प्रभुः स्वयमेव भक्तैः सह मेलितुं ब्रह्मोत्सवे विभिन्नेषु वाहनेषु उपविश्य आयाति। तत्र भगवान्-भक्तयोर्मध्ये विभेदः न दृश्यते। ब्रह्मोत्सवस्य पालनेन सामाजिकाः बहुपुण्यं लभन्ते। मानवाः सततं धनधान्ययुक्ताः भवन्ति।

**ब्रह्मोत्सवतारावलीखण्डकाव्यस्य धार्मिकमहत्त्वम्-**

चतुर्वर्गफलप्राप्तिः सर्वेषां लक्षम्।तत्र प्रभुवेङ्कटेशस्य सेवया तत् लभ्यते। प्रभुः विश्वस्रष्टा, विश्वद्रष्टा च। तस्याज्ञया सर्वे चलन्ति। भगवान् लघुशेषवाहनस्योपरि उपविश्य यदा आयाति तदा भक्ताः सानन्देन पदसेवां कुर्वन्ति। कल्पवृक्षः समेषां मनोरथं पूरयति।एतत्तु अस्माकं धार्मिकविश्वासः। प्रभुः वेङ्कटेशः ब्रह्मोत्सवे पारिजातमूले कल्पवृक्षसदृशः विराजते। भक्ता तस्मिन् दिने तेषां मनोरथपूरणाय

विविधां कामनां कुर्वन्ति। भगवान् तेषां मनोरथं सफलं कारयति। अतः कविना उच्यते-

**श्रीपारिजाततरुमूले विराजी**
**सत्कल्पवृक्षसदृशो निखिलं च दत्ते।**
**धर्मं धर्मं विविधकाममिहाद्य मुक्तिं**
**श्रीवेङ्कटाद्रिनिलयो विनतार्थि संघे।।**[13]

ब्रह्मोत्सवस्य धार्मिकतत्त्वानि सामाजिकान् च सत्पथि परिचालनाय शृङ्खलितजीवनधारणाय च प्रेरयति।

**उपसंहारः-**

प्रभुवेङ्कटेशस्य ४५० उत्सवेषु ब्रह्मोत्सवः प्रधानः।अस्मिन्नवसरे भक्तानां समावेशः तिरुमालायां दृश्यते। ब्रह्मोत्सवपालने ब्रह्मा स्वयम् आविर्भूतः सन् मार्गदर्शी भवति। सर्वे देवाः विष्णुस्वरुपस्य वेङ्कटेशस्य सेवां कुर्वन्ति।ब्रह्मोत्सवे भगवतः दर्शनमात्रेण मनुष्यः पापेभ्यो मुक्तः भूत्वा मोक्षं प्राप्नोति इति भक्तानां दृढविश्वासोऽस्ति। 'कलौ वेङ्कटनायकः' अर्थात् कलियुगे श्रीवेङ्कटेश्वरः एव प्रत्यक्षदैवतमस्ति, तस्य ब्रह्मोत्सवः च अस्य जीवन्तं प्रमाणम्।

**सन्दर्भग्रन्थसूची-**

अमरकोशः-अमरसिंहः
ब्रह्मोत्सवतारावली-आचार्य जि.एस्.आर्.कृष्णमूर्तिः।

**पादटिप्पणी-**

1. ब्र.ता-श्लो.2
2. ब्र.ता-श्लो.4
3. ब्र.ता-श्लो.5
4. ब्र.ता-श्लो.6
5. ब्र.ता-श्लो.9
6. ब्र.ता-श्लो.10
7. ब्र.ता-श्लो.13
8. ब्र.ता-श्लो.15
9. ब्र.ता-श्लो.16
10. ब्र.ता-श्लो.20
11. ब्र.ता-श्लो.26
12. ब्र.ता-श्लो.27
13. ब्र.ता-श्लो.12